अश्वीयः, त्रि, (अश्वाय हितः । अश्व + छ ।) अश्वहितकारी ॥ इति मेदिनी ॥ अश्वसम्बन्धीयः ॥

अष् ञ (भ्वादिं-उभं-सकं-सेट् ।) दीप्तौ । ग्रहणे । गतौ । इति कविकल्पद्रुमः ॥ ञ अषति अषते । इति दुर्गादासः ॥

अषडक्षीणः, त्रि, (अविद्यमानानि षडक्षीणि यत्र । असषडक्षाशितङ्ग्वलंकर्म्मेति स्वार्थे खः । अक्षिशब्दोऽत्र श्रोत्रेन्द्रिये वर्त्तते । बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् ।) यो मन्त्रादिर्द्वाभ्यां क्रियते न तृतीयादीनां गोचरः । इत्यमरः । दुइजने करा मन्त्रणा इति भाषा ॥

अषाढः, पुं, (अषाढया युक्ता पौर्णमासी आषाढी, सा यत्र मासे अण् वा ह्रस्वः । आषाढी पूर्णिमा प्रयोजनमस्य । प्रयोजनार्थे अण् ।) आषाढमासः । व्रते पालाशदण्डः । इत्यमरटीकाभरतद्विरूपकोषः ॥

अषाढकः, पुं, (अषाढ + स्वार्थे कन् ।) आषाढमासः । इति शब्दमाला ॥

अष्ट, [न्] त्रि, (अश्नुते अश् व्याप्तौ कन् ।) सप्यशूभ्यां तुट् चेति कनिन् ।) संख्याविशेषः । ८ आट इति भाषा । नित्यबहुवचनान्तशब्दोऽयं । इति व्याकरणं ॥ अष्टवाचकशब्दाः । योगाङ्गं १ वसुः २ शिवमूर्त्तिः ३ दिग्गजः ४ सिद्धिः ५ ब्रह्मश्रुतिः ६ व्याकरणं ७ दिक्पालः ८ अहिः ९ कुलाद्रिः १० ऐश्वर्यं ११ । इति कविकल्पलता ॥

अष्टकः, त्रि, (अष्टावध्यायाः परिमाणमस्य । अष्टन् + कन् ।) अष्टसंख्या । अष्ट एवाष्टकः स्वार्थे कप्रत्ययः । अष्टसंख्याविशिष्टं यथा,—"गङ्गाष्टकं पठति यः प्रयतः प्रभाते वाल्मीकिना विरचितं सुखदं मनुष्यः" । इति वाल्मीकीयगङ्गाष्टकं ॥ अपि च ।
"अच्युतं केशवं विष्णुं हरिं सत्यं जनार्द्दनं ।
हंसं नारायणञ्चैव एतन्नामाष्टकं शुभं" ॥
इति ब्रह्मपुराणे श्रीविष्णुनामाष्टकं स्तोत्रं ॥

अष्टकर्णः, पुं, (अष्टौ कर्णा यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥

अष्टका, स्त्री, (अश्नन्ति पितरोऽस्याम् । अश् + तकन् ।) श्राद्धविशेषः । तिथिभेदः । तद्यथा । गौणचान्द्रपौषमाघफाल्गुनमासीयकृष्णाष्टमी । आश्विनकृष्णाष्टमी च । एतासु श्राद्धमावश्यकं । यथा । आग्रहायण्या ऊर्द्धं तिसृषु कृष्णाष्टमीषु श्राद्धानि नित्यानि । यथा गोभिलः ।
"अष्टका योर्द्धमाग्रहायण्यास्तमिस्राष्टमी" ।
इति । ब्रह्मपुराणे ।
"पिण्डदानाय मूले स्युरष्टकास्विव एव च ।
कृष्णपक्षे वरिष्ठा हि पूर्व्वा चैन्द्री विभाव्यते ॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेवकी ।
आद्या पूपैः सदा कार्य्या मांसैरन्या भवेत्तथा ॥
शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः" ।
मूले प्रधानस्थाने अमावास्यायां अमावास्या हि श्राद्धस्य प्रधानकालस्तद्वदिति यावत् । ऐन्द्री साभिरिन्द्रदेवताकयागसम्बन्धात् । एवं प्राजापत्या वैश्वदेवकी च । मांसैः पशोः । तथा च गोभिलः ।
"यद्युवाल्पतरसम्भारः स्यात्तदापि पशुनैव कुर्य्यात्" इति । यद्युवेति निपातसमुदायो यद्यर्थे पशुरपि छाग एव । छागोऽनादेशे पशुः । इति गौतमात् । न च तैथ्या ऊर्द्धमष्टम्यां गौः । इति गोभिलसूत्रेण गवोपदेशात् कथमनुपदिष्टत्वमिति वाच्यं । तदसम्भवे पशुरित्यनेन यः पशुरुपदिष्टस्तस्य विशेषतोऽनुपदिष्टत्वात् । तैषी पौषी । वस्तुतस्तु हरिवंशे मृगोऽपि विहितः । यथा,—
"इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत् ।
मांसमानय श्राद्धाय मृगं हत्वा महाबलः" ॥
इति । स्त्रिया बधाभावमाह सएव ।
"अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपि" ।
एतदर्द्धं ब्रह्मपुराणेऽपि । आरण्यानामगस्त्यप्रोक्षितत्वं वक्ष्यते । पश्वभावे स्थालीपाकेन । यथा गोभिलः । "अपि वा स्थालीपाकं कुर्व्वीत" । इति । तद्विधानन्तु ।
"स्थालीपाकं पशुस्थाने कुर्य्याद्यद्यानुकल्पिकं ।
श्रपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु" ॥
इति छन्दोगपरिशिष्टोक्तं ग्राह्यं । अन्विति ओदनचरोः पश्चात् । अतएव सातातपः ।
"नवोदके नवान्ने च गृहप्रच्छादने तथा ।
पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ॥
तस्माद्दद्यात् सदा युक्तो विद्वत्सु ब्राह्मणेषु च" ।
तस्मादन्नं प्रधानं । पूपादिकन्तूपकरणत्वेन शक्तानामावश्यक उभयत्र सदेति श्रवणात् । तथा च ।
"नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत् ।
उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात् ॥
सदाश्रुतेर्व्वीप्सया च तन्नित्यमिति कीर्त्तितं" ।
इति तिथ्यादितत्त्वम् ॥
गौणचान्द्रपौषस्य कृष्णाष्टमी पूपाष्टका । गौणचान्द्रमाघस्य कृष्णाष्टमी मांसाष्टका । गौणचान्द्रफाल्गुनस्य कृष्णाष्टमी शाकाष्टका । केषाञ्चिन्मते गौणचान्द्राश्विनस्य कृष्णाष्टमी अष्टकापदवाच्या । तासु क्रमात् पूपमांसशाकैः षाट्पौषिकं श्राद्धं कर्त्तव्यं । इति ब्रह्मवायुविष्णुधर्म्मोत्तरपुराणानि ॥

अष्टकाङ्गं, क्ली, (अष्टकमङ्गमस्य ।) नयपीठी । इति त्रिकाण्डशेषः ॥ पाशार छक् इति भाषा ।

अष्टपात्, [द्] पुं, (अष्टौ पादा यस्य ।) लूता । माकड़सा । इति भाषा । शरभः । इति हेमचन्द्रः ॥

अष्टपादः, पुं, (अष्टौ पादा यस्य ।) ऊर्णनाभविशेषः । तत्पर्य्यायः । किन्तनुः २ । इति त्रिकाण्डशेषः ॥

अष्टपादिका, स्त्री, (अष्टसु दिक्षु पादा यस्याः । अन्त्यलोपः । ङीपि पद्भावे संज्ञायां कन् ह्रस्वः ।) लताविशेषः । इति रत्नमाला ॥ हापरमाली इति भाषा ॥

अष्टमः, त्रि, अष्टानां पूरणः । इति व्याकरणं ॥ (तस्य पूरणे डट् । नान्तादसङ्ख्यादेर्मट् ।) यथा । कात्यायनः ।
"अष्टमेऽंशे चतुर्द्दश्याः क्षीणो भवति चन्द्रमाः ।
अमावास्याष्टमांशे च ततः किल भवेदणुः" ॥
इति श्राद्धतत्त्वं ॥ अपि च ।
"सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम" ॥
इति देवीमाहात्म्यं ॥

अष्टमङ्गलं, क्ली, (अष्टप्रकारं मङ्गलम् ।) अष्टप्रकारमङ्गलद्रव्यं । तद्यथा,—
"मृगराजो वृषो नागः कलशो व्यजनन्तथा ।
वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलं" ॥
इति वृहन्नन्दिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतौ ॥
"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः" ॥
इति शुद्धितत्त्वं ॥

अष्टमङ्गलः, पुं, (अष्टौ मङ्गलानि शुभचिह्नानि यस्मिन् ।) श्वेतवर्णमुखवक्षःखुरकेशपुच्छयुक्तघोटकः । इति हेमचन्द्रः ॥

अष्टमङ्गलघृतं, क्ली, (अष्टाभिः मङ्गलजनकद्रव्यैः कृतं यद्घृतं ।) अष्टौषधयुक्तपक्वघृतं । यथा,—
"वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च ।
सारिवा सैन्धवञ्चैव पिप्पली घृतमष्टमं ॥
सिद्धं घृतमिदं मेध्यं पिबेत् प्रातर्द्दिने दिने ।
दृढ़स्मृतिः कुमाराणां पिबतामष्टमङ्गलं" ॥
इति भावप्रकाशः ॥

अष्टमानं, क्ली, (अष्टौ मुष्टयः परिमाणमस्य ।) कुड़वपरिमाणं । शरावार्द्धं । इति वैद्यकपरिभाषायां ॥
("प्रसृतिभ्यामञ्जलिःस्यात् कुड़वोऽर्द्धशरावकः ॥
अष्टमानञ्च स ज्ञेयः", इति शार्ङ्गधरः ॥)

अष्टमिका, स्त्री, (अष्टम + कन् + स्त्रियामाप् ।) शुक्तिपरिमाणं । चतुस्तोलकं । इति वैद्यकपरिभाषायां ॥
("स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा" ॥
इति शार्ङ्गधरः ॥)

अष्टमी, स्त्री, (अष्टानां पूरणी । अष्टम + ङीप् ।) क्षीरकाकोली । इति शब्दचन्द्रिका ॥ तिथिविशेषः । सा चन्द्रस्याष्टमकलाक्रियारूपा । तदुपलक्षितकालरूपा च । सा च शुक्ला नवमीयुता ग्राह्या शुभात् । कृष्णा च सप्तमीयुता । यथा निगमः ।
"कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्द्दशी ।
पूर्व्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ॥
उपवासादिकार्य्येषु एष धर्म्मः सनातनः" ॥ • ॥
भविष्यपुराणे ।
"चतुर्द्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः ।
योऽब्दमेकं न भुञ्जीत शिवार्च्चनपरो नरः ॥
यत् पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनां ।
तत्पुण्यं सकलं तस्य शिवलोकञ्च गच्छति" ॥
ततश्च सततसत्रयाज्यक्षयपुण्यसमपुण्यप्राप्तिः शिवलोकगतिश्च फलं । फाल्गुनशुक्लाष्टमीचतुर्द्दश्योरारभ्य वर्षं यावत् प्रत्यष्टमीप्रतिचतुर्द्दश्युपवासव्रतं ॥ • ॥ कालिकापुराणे ।
"शैवा ललितकान्ताख्या देवी मङ्गलचण्डिका ।
वरदाभयहस्ता च द्विभुजा गौरदेहिका ॥